# Namaskarashtakam

# નમસ્કારાષ્ટકમ્

## Document Information

Text title : namaskArAShTakam

File name : namaskArAShTakam.itx

Category : raama, aShTaka

Location : doc_raama

Author : murAridevAchArya

Transliterated by : Rajesh Thyagarajan

Proofread by : Rajesh Thyagarajan

Latest update : June 16, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2021

*sanskritdocuments.org*

# નમસ્કારાષ્ટકમ્

રમાકાન્તરામં ભવારામરામં વિરામેઽભિરામં પ્રશાન્તપ્રકામમ્ ।
પરબ્રહ્મરૂપં ચિદાનન્દરૂપં સ્ફુરચ્ચારુચાપં નતોઽહં નતોઽહમ્ ॥ ૧॥

નભોનીલરૂપં ધૃતાનન્તરૂપં કૃતારિપ્રકોપં હૃતારિપ્રપાપમ્ ।
જટાજૂટરૂપં સતીભ્રાન્તિકારં ત્રિલોકોપકારં નતોઽહં નતોઽહમ્ ॥ ૨॥

અહલ્યાઘહારં હિ તારાજતારં ભવામ્ભોધિપારં ગૃહીતાવતારમ્ ।
શ◌ૃતિવ્રાતસારં ધરાધામધારં દશાસ્યાપહારં નતોઽહં નતોઽહમ્ ॥ ૩॥

કૃતામ્ભોધિસેતું સુરત્રાણહેતું મદાન્ધાઁશ્ચજેતું રઘોર્વંશકેતુમ્ ।
રિપૌ દણ્ડ પાણિં રણે શાર્ઙ્ગપાણિં મનોહારિવાણિં મતોઽહં નતોઽહમ્ ॥ ૪॥

મુનીન્દ્રૈઃ સુરેન્દ્રૈર્દ્વિજેન્દ્રૈર્નરેન્દ્રૈઃ સુગીતં સસીતં પ્રદીમં પ્રપીતમ્ ।
દહન્તં પ્રદાહં સુબાહું નૃસિંહં તડિત્તાડકાહં નતોઽહમ નતોઽહમ્ ॥ ૫॥

જગજ્જાનૃપાલં ભવાલમ્બનાલં ધૃતામ્ભોજમાલં કૃપાલું નૃપાલમ્ ।
ચલચ્ચારુચાલં કરાદત્તતાલં સુસાકેતબાલં નતોઽહં નતોઽહમ્ ॥ ૬॥

કપીન્દ્રાદિન્વદ્યં નૃપેન્દ્રાદ્યનિન્દ્યં ખરાખર્વગર્વં હરન્તં વરં તમ્ ।
મહાકાલકાલં મહાવાલિનેઽલં બલેરઙ્ગવાલં નતોઽહં નતોઽહમ્ ॥ ૭॥

ગ્રસદ્વ્યાલકાલં મહાશ્ચર્યશીલં કૃતારણ્યવાસં ધૃતાગણ્યભાસમ્ ।
સદાશ્રીનિવાસં સસન્મન્દહાસં સુસીતાવિલાસં નતોઽહં નતોઽહમ્ ॥ ૮॥

આચાર્યસાર્વભૌમેણ શ્રીમદ્દેવમુરારિણા ।
પ્રણીતમષ્ટકં ચૈતત્ પઠતાં મુક્તિદાયકમ્ ॥ ૯॥

ઇતિ જગદ્ગુરુશ્રીમુરારિદેવાચાર્યપ્રણીતં નમસ્કારાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Rajesh Thyagarajan

*Namaskarashtakam*

pdf was typeset on June 16, 2021

Please send corrections to *sanskrit@cheerful.com*